उपयुज्यते अत्र तु नायकसम्भावनं स्मितमुपायनम् द्यूते च दृढ़तया आश्लेषरूपपणनम्। अत्र प्रथमार्द्धे वैयधिकरण्येन द्वितीयार्द्धे सामानाधिकरण्येनेति भेदः।

५७ परिवृत्तिः “परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत्” च० “दत्त्वा कटाक्षलक्ष्मीं सा जग्राह हृदयं मम। मयास्यै हृदयं दत्तं गृहीतो मदनज्वरः” “पूर्व्वार्द्धे समेन शेषार्द्धे न्यूनेन” “येन जर्जरकलेवरव्ययात् क्रीतमिन्दुकिरणोज्ज्वलं यशः” अन्योन्यान्तर्भाविनीति स०कण्ठा०।

५८ परिसंख्या “परिसंख्या निषिध्यैकमेकस्मिन् वस्तु यन्त्रणम्” च०। “स्नेहक्षयः प्रदीपेषु न स्वान्तेषु नतभ्रुवाम्”।

५९ पर्य्यस्तापह्नुतिः “अन्यत्र तस्यारोपार्थः पर्य्यस्तापह्नुतिस्तु सा” च०। नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखम्”।

६० पर्य्यायः “क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात्। भवति क्रियते वा चेत्तदा पर्य्याय इष्यते॥” सा०द० क्रमेण यथा। “स्थिताः क्षणं पक्ष्मसु ताड़िताधराः पयोधरोत्सेधनिपातचूर्णिताः। बलीषु तस्याः स्खलिताः प्रपेदिरे क्रमेण नाभिं प्रथमोदविन्दवः” ॥ “विचरन्ति विलासिन्यो यत्र श्रोणिभरालसाः। वृककाकशिवास्तत्र धावन्त्यरिपुरे तव” ॥ “विम्बोष्ठरागादधरान्निवर्त्तितस्तनाङ्गरागादरुणाच्च कन्दुकात्। कुशाङ्कुरादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः”। “ययोरारोपितस्तारो हारस्तेऽरिवधूजनैः॥ निधीयन्ते तयोः स्थूलाः स्तनयोरश्रुविन्दवः” ॥ एषु च क्वचिदाधारः संहतरूपोऽसंहतरूपश्च। क्वचिदाधेयमपि यथा “स्थिताः क्षणमित्यत्र” उदविन्दवः पक्ष्मादावसंहतरूप आधारे क्रमेणाभवन्। “विचरन्ति” इत्यत्राधेयभूता वृकादयः संहतरूपारिपुरे क्रमेणाभवन्।

६१ पर्य्यायोक्तम् “पर्य्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते” सा०द० “स्पृष्टास्ता नन्दने शच्याः केशसम्भोगलालिताः। सावज्ञं पारिजातस्य मञ्जर्य्यो यस्य सैनिकैः”।

६२ पिहितम् “पिहितं परवृत्तान्तज्ञातुः साकूतचेष्टितम्” च०। “प्रिये गृहागते प्रातः कान्ता तल्पमकल्पयत्”। प्रिये गृहागते परनारिकया सह रात्रिजागरणेन प्रातःशयनसुचितमिति ज्ञापनाय कान्तया तल्पकल्पनं साकूतं चेष्टितम्।

६३ पुनरुक्तवदाभासः “आपाततो यदर्थस्य पौनरुक्त्यावभासनम्। पुनरुक्तवदाभासः स भिन्नाकारशब्दगः” सा०द० “भुजङ्गकुण्डली व्यक्तः शशिशुभ्रांशुशीतगुः। जगन्त्यपि सदापायादव्याच्चेतोहरः शिवः” ॥ अत्र भुजङ्गकुण्डल्यादिशब्दानाम् आपातमात्रेण समानार्थतया पौनरुक्त्यप्रतिभासनम्। पर्य्यवसाने तु भुजङ्गरूपं कुण्डलं विद्यते यस्येत्याद्यन्यार्थत्वम्। पायादित्यस्यापायादित्यत्र पर्य्यवसानम्। भुजङ्गकुण्डलीतिशब्दयोः प्रथमस्यैव परिवृत्तिसहत्वम्। हरः शिव इत्यत्र द्वितीयस्यैव। शशिशुभ्रांशुपदयोः द्वयोरपि। शब्दपरिवृत्तिसहत्वासहत्वाभ्याम् अस्योभयालङ्कारत्वम्। “भाति सदा न त्याग इति” अत्र तु न द्वयोरपीति शब्दालङ्कारत्वमिति भेदः।

६४ पूर्व्वरूपम् “पुनः स्वगुणसंप्राप्तिः पूर्व्वरूपमुदाहृतम्। पूर्व्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि”। च० “हरकण्ठांशुदीप्तोऽपि शेषस्त्वद्यशसा सितः”। “दीपे निर्वापितेऽप्यासीत् काञ्चीरत्नैर्महन्महः”।

६५ प्रतिवस्तूपमा “प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्ययोः। एकोऽपि धर्म्मः सामान्यो यत्र निर्द्दिश्यते पृथक्” सा०द० “धन्यासि वैदर्भि! गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि। इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति” ॥ अत्र समाकर्षणमुत्तरलीकरणञ्च क्रिया एकैव पौनरुक्त्यनिरासाय भिन्नरूपतया निर्द्दिष्टा। इयं मालयापि दृश्यते यथा। “विमल एव रविर्विशदः शशी प्रकृतिशोभन एव हि दर्पणः। शिवगिरिः शिवहाससहोदरः सहजसुन्दर एव हि सज्जनः” ॥ अत्र विमलविशदादिरर्थत एक एव। वैधर्म्म्येण यथा। “चकोर्य्य एव चतुराश्चन्द्रिकापानकर्म्मणि” ॥

६६ प्रतिषेधः “प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्त्तनम्”। च० “न द्यूतमेतत् कितवाः! क्रीडनं निशितैः शरैः”।

६७ प्रतीपम् “प्रतीपमुपमानस्याप्युपमेयत्वकल्पनम्१। अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत्२। वर्ण्योपमानलाभेन तथान्यस्याप्यनादरः३। वर्ण्यान्यस्योपमाया अनिष्पत्तिर्वचश्च तत्४। प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते”५ च० “क्रमेण यथा। “त्वल्लोचनसमं पद्मम्”१ “अलं गर्वेण ते वक्त्र! कान्त्या चन्द्रोभवादृशः”२। “कः क्रौर्य्यदर्पस्ते मृत्यो! त्वत्तुल्याः सन्ति हि स्त्रियः” ३। “मिथ्यावादोहि मुग्धाक्षि! त्वन्मुखाभं किलाम्बुजम्”। ४। “दृष्टं चेत् वदनं तस्याः किं पद्मेन किमिन्दुना”। ५।

६८ प्रत्यक्षम्। “प्रत्यक्षमक्षजं ज्ञानं मानसं चाभिधीयते। स्वानुभूतिभवं चैवमुपचारेण कथ्यते”। स० कण्ठा०। तच्च युगपदेकशोवा तत्र युगपत् यथा। “कान्तकान्तवदनप्रतिबिम्बे मग्नबालसहकारसुगन्धौ। स्वादुनि प्रण-